# श्री सुरसरस्वती सभा शृङ्गेरि

## तृतीया परीक्षा

### प्रथमपत्रिका

दिनाङ्कः – 30-8-2015 अङ्काः–100

पूर्वाह्णे – 10-00 तः 1-00 पर्यन्तम् समयः–घण्टात्रयम्

**1 एकवाक्येन संस्कृतभाषया उत्तरं लिखत । (अष्टानामेव)** 8

1. विष्णुः कैः ध्यानगम्यः ?
2. बालिकायाः हस्ते किमासीत् ?
3. अचक्षुषां चक्षुः कः ?
4. रामशुकः कुत्र न्यवसत् ?
5. द्रोणाचार्यस्य प्रसिद्धः शिष्यः कः ?
6. शङ्कराचार्यस्य मातापितरौ कौ ?
7. भुजङ्गमः रोषात् किमकरोत् ?
8. धीराः कस्मात् पदं न प्रविचलन्ति ?
9. भूतानां प्रलयोदयौ कौ ?
10. अमरशक्तेः पुत्राः कीदृशाः ?

**2 द्वित्रैः वाक्यैः संस्कृतभाषया उत्तरं लिखत । (पञ्चानामेव)** 10

1. व्याधः कथमासीत् ?
2. सीता कुत्र कथं अवर्तत ?
3. पितामहः आत्मानं कथं दर्शितवान् ?
4. ब्राह्मणपुत्रः दीनारकं दृष्ट्वा किं चिन्तितवान् ?
5. गृहिणी द्विजं किम् अवदत् ?
6. सर्वलोकैकनाथः कः ? तस्य आकारः कीदृशः ?
7. हनूमान् समुद्रस्योपरि किं किं चकार ?



पश्चादनुवर्तते

**3** **पञ्चषैः वाक्यैः संस्कृतभाषया उत्तरं लिखत । (त्रयाणामेव)** 9

1. चित्रग्रीवः कः ? स्वाश्रितान् सः कथं ररक्ष ?
2. अमरशक्तेः अमात्येषु एकस्याभिप्रायः कः ?
3. हनूमान् सीतां कथम् आश्वासयामास ?
4. शङ्कराचार्येण कुत्र कुत्र मठाः स्थापिताः ? कुतः ?

**4** **त्रयाणामुत्तरं मातृभाषया आङ्ग्लभाषया वा लिखत ।** 12

1 ''न हि कृतम् उपकारम् साधवो विस्मरन्ति'' सोदाहरणम् विवृणुत ।
2. हरिदत्तः कः ? सः किमर्थं सर्पपूजां कृतवान् ? कथम् ?
3. मल्लस्य नाम किम् ? तस्य सामर्थ्यं विशदयत ?
4. भोजेन दत्ता समस्या का ? केन कथं समस्या पूरिता ?

**5** **मातृभाषया आङ्ग्लभाषया वा ससन्दर्भं विवृणुत । (चतुर्णामेव )** 12

1. मन्त्रमेकम् उपदिशामि ।
2. अये विप्र, आवां यमलौ ।
3. निषादाधिपतेः सुतः द्रोणशिष्योऽहम् ।
4. अतस्त्वं क्रोधं त्यज ।
5. प्रभूतधनेन योजयिष्यामि ।

**6** **अन्वयानुसारमर्थं मातृभाषया आङ्ग्लभाषया वा लिखत । (द्वयोरेव)** 4

1. विद्यया विमलयाऽप्यलङ्कृतो
   दुर्जनः सदसि मास्तु कश्चन ।
   साक्षरा हि विपरीततां गताः
   केवलं जगति तेऽपि राक्षसाः ।।

2. मा विषादं कृथा देवि राघवो रावणं रणे ।
   हत्वा त्वां नेष्यतीत्येनाम् आश्वास्य स विनिर्ययौ ।।

3. एकमेवाक्षरं यस्तु गुरुः शिष्यं प्रबोधयेत् ।
   पृथिव्यां नास्ति तद्द्रव्यं यद्दत्वा चानृणी भवेत् ।।

**7** **श्लोकं पूरयत । (द्वावेव)** 4

1. निन्दन्तु ........................................................... धीराः ।।
2. आद्यायामित ................................................... शम्भवे ।।
3. सुखार्थी ........................................................ सुखम् ।।

**8** **मातृभाषया अनुवादं कुरुत ।** 5

तस्मिन्नेव समये चित्रग्रीवनामा कपोतराजः सपरिवारः वियति विसर्पन् तान् तण्डुलकणान् अवलोकयामास। ततः स चित्रग्रीवः तण्डुलकणलुब्धान् कपोतान् प्रत्याह – ''कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भवः? भद्रमिदं न पशयामि। सर्वथा अविचार्य कर्म न कर्तव्यम् ।''

**9** **रिक्तस्थानानि पूरयत ।** 3

1. वन्दे विष्णुं ...................... सर्वलोकैकनाथम् ।
2. मनुष्याणां क्रोधः ........................... रिपुः ।
3. ...................... पद्मं सितमपि च शुकं पुस्तकं चापरेण ।

**10** **पर्यायपदानि लिखत । (त्रयाणामेव)** 3

1. घृणी 2. भूसुरः 3. द्राक् 4. अर्णवम्

**11** **विरुद्धार्थकपदानि लिखत । (त्रयाणामेव)** 3

1. सूक्ष्मः 2. दुर्जनः 3. दूरम् 4. अन्धकारः

**12** **वाक्ये योजयत । (त्रयाणामेव)** 3

1. एकदा 2. गत्वा 3. कृतवान् 4. तुल्यम्

**13** **त्रिषु पुरुषवचनेषु लिखत । (एकस्य)** 3

1. अभूत् 2. वेत्ति 3. वसतु

**14** **सन्धिं विभज्य नाम लिखत । (त्रयाणामेव)** 3

1. उभावपि 2. मतिरभूत् 3. जगद्गुरुः 4. गिरिरयम्



पश्चादनुवर्तते

**15** **प्रश्नवाक्यानि रचयत ।** 3

1. अमरशक्तेः त्रयः पुत्राः आसन् ।
2. गोदावरीतीरे शाल्मली तरुः अस्ति ।
2. प्रातःकाले पक्षिणः कूजन्ति ।

**16** **व्याकरणविशेषं लिखत । (द्वयोरेव)** 3

1. शम्भवे नमः ।  2. विषादं मा कृथाः ।
3. वायसेन सह ।

**17** **प्रयोगं परिवर्तयत ।** 3

1. द्विजः बलाकं पश्यति ।
2. ब्राह्मणपुत्रेण सर्पः ताडितः ।
3. श्रूयतां मम एषः सिंहनादः ।

**18** **वाक्यदोषान् परिहरत ।** 3

1. शालायाः परितः वृक्षाः सन्ति ।
2. रामस्य सह सीता अपि गच्छति ।
3. सीतां नमः ।

**19** **लोकोक्तिं पूरयित्वा अर्थं मातृभाषया आङ्ग्लभाषया वा लिखत ।** 3

1. चक्रारपङ्क्तिरिव .......................................... पङ्क्तिः ।
2. यादृशं ............................................... तादृशी ।

**20** **समूहेतर पदं चित्वा लिखत ।** 3

1. पद्मं, शुकं, मयूरं, पुस्तकं
2. भूरियम्, सोऽहम्, लोकोऽयम्, वृक्षोऽसौ
3. मित्रभेदः, मित्रप्राप्तिः, काकोलूकीयम्, विग्रहः।

* * * * *

# श्री सुरसरस्वती सभा शृङ्गेरि

## तृतीया परीक्षा

### द्वितीयपत्रिका

दिनाङ्कः – 30-8-2015 अङ्काः–50

अपराह्णे – 1-30 तः 3-00 पर्यन्तम् समयः–सार्धैकहोरा

**1 दशभिर्वाक्यैः संस्कृतभाषया प्रबन्धमेकं लिखत ।** 5

1. गौः 2. उद्यानम् 3. सूर्यचन्द्रौ

**2 संस्कृतभाषया पत्रमेकं लिखत ।** 5

1) भगिन्याः विवाहार्थम् विरामं प्रार्थयन् वर्गोपाध्यायं प्रति पत्रम् ।
2) गृहम् आगन्तुम् मित्राय पत्रम्।

**3 द्वयोः लक्षणम् सोदाहरणं मातृभाषया आङ्ग्लभाषया वा लिखत ।** 6

1. विशेषणानि 2. उपसर्गाः 3. भविष्यत्कालः

**4 सर्वेषु पुरुषवचनेषु लिखत । (द्वावेव)** 6

1. अलभत 2. लिखेत् 3. वदतु

**5 एकस्य रूपाणि सर्वविभक्तिवचनेषु लिखत ।** 4

1. गुरु 2. युष्मद् 3. राजन्

**6 वाक्यदोषान् परिहरत ।** 3

1. अलं विषादः ।
2. आम्रफलं मया रोचते ।
3. नीलं मेघः गर्जति ।

**7 प्रयोगपरिवर्तनं कुरुत।** 3

1. शिशुना दुग्धं पीयते ।
2. रमेशः गृहं गच्छति ।
3. भासः नाटकानि अलिखत् ।



पश्चादनुवर्तते

**8** **कृदन्तपदं चित्वा नामनिर्देशं कुरुत।** 3

1. पत्रं विलिख्य मित्राय ददाति ।
2. तत्र गत्वा पुस्तकं आनय ।
3. देवं नन्तुम् बालकः मंदिरं गच्छति ।

**9** **अन्यलिङ्गरूपं लिखत ।** 3

1. कृतवान् 2. गता 3. पठितवती

**10** **एकं वाक्यं मातृभाषया आङ्लभाषया वा विवृणुत ।** 2

1. अति सर्वत्र वर्जयेत् ।
2. विनाशकाले विपरीतबुद्धिः ।

**11** **मातृभाषया अनुवादं कुरुत ।** 5

1. विद्वांसः सर्वत्र पूज्यन्ते ।
2. शिशुपालेन कृष्णः अनिन्द्यत ।
3. रजकः वस्त्राणि क्षालयितुं तडागं गतवान् ।
4. नारिकेलवृक्षः सागरतीरे रोहति ।
5. आकाशे नक्षत्राणि नक्तं राजन्ति ।

**12** **संस्कृतभाषया अनुवदं कुरुत ।** 5

1. ಗೌರಿ ಮನೆಯ ಒಳಗಡೆ ಇದ್ದಾಳೆ.
   Gowri is in the house.
2. ನೀವು ಹಳ್ಳಿಯಿಂದ ಯಾವಾಗ ಬರುತ್ತೀರಿ?
   When will you comeback from the village.
3. ನಿನ್ನ ಉತ್ತರದಿಂದ ನನಗೆ ಸಂತೋಷವಾಯಿತು.
   I am pleased by your reply.
4. ಪಕ್ಷಿಗಳು ಗೂಡಿನಲ್ಲಿ ಸುಖವಾಗಿ ವಾಸಿಸುತ್ತವೆ.
   Birds live happily in the nests.
5. ಅರ್ಜುನನು ಬೇಟೆಯಾಡಲು ಕಾಡಿಗೆ ಹೋದನು.
   Arjuna went to the forest to hunt.

* * * * *